स्तत्कर्त्तव्यं विजानतेति” । साक्षिसभ्यविकल्प इति उभयोरर्थिप्रत्यर्थिनोः किमेते वक्ष्यन्तीति साक्षिसभ्यविषयको विकल्पो भवेत् तत्र कार्य्यनिर्णये दोलायमानौ सन्देहदोलारूढौ यावर्थिप्रत्यर्थिनौ सन्धिं कुर्य्यातान्तौ विचक्षणौ चतुरौ पराजयजनिताऽप्रतिष्ठादितिरोधानादित्यर्थ इति कल्पतरुः । रत्नाकरस्तु “साक्षिणां सभ्यानाञ्च विकल्पः परस्परविरोधः इत्याह । प्रमाणसमतेति । यत्र सभ्यानां वादिद्वयपक्षे प्रमाणं साम्यं प्रतिभाति । यत्र च शास्त्रचरित्रयोर्भेदः शास्त्रे शास्त्रान्तरेण चरित्रे व्यवहारे चरित्रान्तरेण भेदो विप्रतिपत्तिर्न्तु शास्त्रव्यवहारयोः परस्परभेदः धर्मशास्त्राविरोधे व्यवहारस्यार्थशास्त्रत्वेन दुर्बलत्वात्” इति व्याचख्यौ । तत्र राजाज्ञया सन्धिः कार्य्यत्वेन प्रशस्यते धर्म्मार्थोपग्रहादिहेतुत्वात् निग्रहानुग्रहाद्यव्यवस्थानिवर्त्तकत्वाच्च । तस्मादित्यादिना राजाज्ञैव केवलं न सन्धिहेतुः कुलगणाध्यक्षादिवचोऽपि राजवचनसममिति प्रतिपाद्यते । एतच्च प्रत्याकलितं सभ्यैरवश्यमादर्त्तव्यमित्याह नारदः “प्रमाणानि प्रमाणज्ञैः परिपाल्यानि यत्नतः । सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः” । अस्यार्थः स्मृतिचन्द्रिकाकारेणैवमुक्तः “अव्यवस्थितैः प्रमाणैः प्रमाणानि प्रमाणकर्त्तारः प्रमाणशब्देन लक्ष्यन्ते । ते सीदन्ति विनश्यन्ति निर्णयं नाप्नुवन्ति । अतः प्रत्याकलनकौशलेन प्रमाणज्ञैः सभ्यैर्यत्नतस्तानि प्रमाणानि परिपाल्यानि यथा व्यवस्थादुःस्थितानि न भवन्ति तथा विवेचनीयानीत्यर्थ इति” । वयन्तु अव्यवस्थितैर्मूलशैथिल्यादिना दुःस्थितैः प्रमाणैः प्रमाणानुग्राहकैस्तर्कैः प्रमाणानि साक्ष्यादीनि सीदन्ति निर्णयाक्षमाणि भवन्ति, हि यतोऽतः प्रमाणज्ञैः प्रमाणानि यत्नतः परिपाल्यानि सत्तर्कपरिशुद्ध्यनुग्रहेण तत्त्वनिर्णयफलानि कार्य्याणीति व्याचक्ष्महे । अनयोश्च व्याख्यानयोस्तारतम्यन्तत्त्वविद्भिर्विवेचनीयम् । इदञ्च प्रत्याकलितं व्यवहर्त्तृसम्बन्धाभावात् व्यवहारदर्शिमात्रकर्त्तृकत्वाच्च व्यवहारपादचतुष्टयान्तर्भूतमिति मिताक्षराकारस्य सम्मतम् तत्त्वनुपादेयम्, एतदन्तरेण तृतीयक्रियापादानवतारात् । तथाहि उत्तराभिधानानन्तरमर्थिप्रत्यर्थिनोः कस्य क्रिया का वा क्रियेति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानाद्व्यवहर्त्तृसम्बन्धाभावाच्च न व्यवहारपादत्वमिति । अपरार्कस्तु “साध्यसिद्धिपदेन जयपराजयावधारणलक्षणं प्रत्याकलितं योगीश्वरवचने लक्षणया गृह्यत इति वदन् क्रियोपन्यासोत्तरकालीनविचारस्य सभ्यैः क्रियमाणस्य प्रत्याकलितरूपतामभिप्रैति” । “सम्प्रतिपत्त्युत्तरेण क्रियापादे नापि जयपराजयावधारणलक्षणप्रत्याकलितपाद इति द्विपात्त्वमेवेति” ब्रुवाणो वाचस्पतिरपि तदेवानुबध्नाति । कल्पतरुस्मृतिचन्द्रिकाकारौ मिताक्षराकारवदेवोत्तरलेखनान्तरभाविनां हीनपरकरणसन्धिकरणक्रियादानानां क्रियापादप्राग्भाविनां प्रत्याकलितत्वमभिहितवन्तौ । व्यवहारोपयोगित्वाद् वृहस्पत्यादिवचनानां प्रागस्माल्लिखितानामनुरोधाच्च व्यवहारपादत्वं परन्तदनभ्युपगतवन्तौ क्रियापादप्राग्भावितत्वमेव तु तस्य युक्तम् । ये तु तिष्ठन्ति करण इत्यादिवचनात् व्यवहारपादत्वमस्तु नवेत्यन्यदेतत् । यत्तु साध्यसिद्धेर्व्यवहारफलत्वान्न व्यवहारपादत्वं युक्तमिति तन्न व्यवहारभावनया फलापवर्गिण्याः फलनिरूप्यत्वेन फलस्य तदंशत्वेन तत्पादत्वे बाधकाभावात् । अतएव लिङर्था भावनेति मीमांसकानामुद्घोषः । तात्पर्य्यपरिशुद्धावुदयनाचार्य्यस्तु प्रमाणोपन्यासमेव प्रत्याकलितमभिमन्यते यथाह “यद्यपि परीक्षायां न वादिप्रतिवादिनौ स्तः । पृच्छोपक्रममात्रेण द्वितीयोपयोगात् । सम्भवेऽपि तयोर्विषयोपस्थापनमात्रपर्य्यवसानात् स्थेयस्यैव परीक्षकत्वम् । तथापि पूर्वपक्षोत्तरपक्षप्रत्याकलितनिष्कर्षभेदेन चतुष्पाद्व्यवहारप्रवर्त्तनात् फलतो न कश्चिद्विशेषः । एककर्त्तृकत्वेऽपि तावत एव व्यापारकलापस्य विचारे विद्यमानत्वात् तस्मादव्यनिपुणो देशकस्तथापि देश्यं सावगममेवेति” । वस्तुतस्तु न प्रमाणोपन्यासस्तस्य प्रत्याकलितत्वेनाभिप्रेतः । किन्तु सभिककृतः प्रमाणोपष्टम्भककण्टकादिपरामर्श एव । यतो न शास्त्रीयकथायां व्यवहारवत्पूर्वपक्षोत्तरपक्षौ स्वाभिमतसहेतुकसाध्यनिर्देशमात्रपरौ । किन्तु पूर्वपक्षिणा कण्टकोद्धारोत्तरपक्षदूषणपुरःसरं स्वपक्षे स्थिरीकृते सिद्धान्तवादिना तदुभयप्रतिक्षेपेण स्वपक्षसाधकप्रमाणप्रख्यापनं प्रथमं क्रियते । ततः सभ्यैस्तदुभयविवेकाख्यप्रत्याकलितेन निष्कर्ष एकतरपक्षनिर्द्धारणरूपः क्रियते । तावता कथासमाप्तिर्वादे, जल्पवितण्डयोस्तु सभिकादीनामुत्तरोऽपि व्यापारो विद्यत इत्यादि लक्षणमाकरे । अत्र तु साक्ष्यादिविलक्षणं मानमुत्तरभेदेन नियतं प्रागुपन्यासानर्हमिति न पूर्वोत्तरपादान्तर्गतिस्तस्य । अतएव प्रत्याकलितस्यात्रोत्तरे कस्य क्रियेत्यादिविमर्शस्य स्थेयकृतस्य प्रत्याकलितस्य प्राप्त्युत्तं